Shri Shiva Sahasranama Stotra from Shivarahasya 92

# श्रीशिवसहस्रनामस्तोत्रं शिवरहस्ये नवमांशे अध्याय २

## Document Information

Text title : shivasahasranAmastotram shivarahasyAntargatam navamA.nshe adhyAya 2

File name : shivasahasranAmastotramshivarahasya9p2.itx

Category : sahasranAma, shiva, shivarahasya

Location : doc_shiva

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Description-comments : shrIshivarahasyam | navamAMshaH | adhyAyaH 2| 1-142 ||

Source : Shivarahasya Navamanshe Chapter 2

Latest update : May 19, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 12, 2023

*sanskritdocuments.org*

# श्रीशिवसहस्रनामस्तोत्रं शिवरहस्ये नवमांशे अध्याय २

श्रीगणेशाय नमः ॥

॥ अथ नवमांशे द्वितीयोऽध्यायः ॥

स्कन्द उवाच -
शेषाशेषमुखोद्गीतां नामसारावलीमिमाम् ।
हाटकेशोरुकटकभूतेनकहीन(न्द्र)केण तु ॥ १॥

सहस्रनाम यत्प्रोक्तं तत्ते वक्ष्याम्यहं शृणु ।
धन्यं मान्यं महामन्युप्रीतिदायकमुत्तमम् ॥ २॥

नान्येषु दापनीयं ते न देयं वेदमीदृशम् ।
पञ्चास्य हृदयाशास्यमनुशास्यामि ते हृदि ॥ ३॥

ऋषिरस्यादिशेषो वै देवो देवोमहेश्वरः ।
सर्वत्र विनियोगोऽस्य कर्मस्वपि सदा द्विज ।
ध्यानं तस्यानुवक्ष्यामि त्वमेकाग्रमनाः शृणु ॥ ४॥

स्कन्दः उवाच -
ध्यायेदिन्दुकलाधरं गिरिधनु सोमाग्निफालोज्ज्वलं
वैकुण्ठोरुविपाठबाणसुकरं देवं रथेऽधिष्ठितम् ।
वेदाश्वं विधिसारथिं गिरिजया चित्तेऽनुसन्दध्महे
नानाकारकलाविलासजगदान्ददिसम्पूर्तये ॥

एवं ध्यात्वा महादेवं नाम्ना साहस्रमुत्तमम् ।
प्रजपेन्नियतो मन्त्री भस्मरुद्राक्षभूषणः ॥ १॥

लिङ्गमभ्यर्चयन्वापि बिल्वकोमलपल्लवैः ।
पङ्कजैरुत्पलैर्वापि प्रसादाय महेशितुः ॥ २॥

अष्टम्यां वा चतुर्दश्यां पर्वस्वपि विशेषतः ।

यं यं कामं सदाचित्ते भावयेत्तं तमाप्नुयात् ॥ ३॥

अथ सहस्रनाम स्तोत्रम् ।
ॐ गङ्गाधरोऽन्धकरिपुः पिनाकी प्रमथाधिपन् ।
भव ईशान आतार्योऽनेकधन्यो महेश्वरः ॥ १॥

महादेवः पशुपतिः स्थाणुः सर्वज्ञ ईश्वरः ।
विश्वाधिकः शिवः शान्तो विश्वात्मा गगनान्तरः ॥ २॥

परावरोऽम्बिकानाथः शरदिन्दुकलाधरः ।
गणेशतातो देवेशो भववैद्यः पितामहः ॥ ३॥

तरणस्तारकस्ताम्रो प्रपञ्चरहितो हरः ।
विनायकस्तुतपदः क्ष्मारथो नन्दिवाहनः ॥ ४॥

गजान्तको धनुर्धारी वीरघोषः स्तुतिप्रियः ।
प्रजासहो रणोच्चण्डताण्डवो मन्मथान्तकः ॥ ५॥

शिपिविष्टः शाश्वतात्मा मेघवाहो दुरासदः ।
आनन्दपूर्णा वर्षात्मा रुद्रः संहारकारकः ॥ ६॥

भगनेत्रप्रमथनो नित्यजेताऽपराजितः ।
महाकारुणिकः श्वभ्रुः प्रसन्नास्यो मखान्तकः ॥ ७॥

घनाभकण्ठो गरभुक् बब्लुशो वीर्यवर्धनः ।
प्रकटस्तवनो मानी मनस्वी ज्ञानदायकः ॥ ८॥

कन्दर्पसर्पदर्पघ्नो विषादी नीललोहितः ।
कालान्तको युगावर्तः सङ्क्रन्दनसुनन्दनः ॥ ९॥

दीनपोषः पाशहन्ता शान्तात्मा क्रोधवर्धनः ।
कन्दर्पो विसलज्जन्द्रो लिङ्गाध्यक्षो गजान्तकः ॥ १०॥

वैकुण्डपूज्यो विश्वात्मा त्रिणेत्रो वृषभध्वजः ।
जह्नुजापतिरीशानः स्मशाननिलयो युवा ॥ ११॥

पार्वतीजानिरुह्याढ्यो नाद्यविद्यापरायणः ।
सामवेदप्रियो वैद्यो विद्याधिपतिरीश्वरः ॥ १२॥

कुमारजनको मारमारको वीरसत्तमः ।
लम्बलाश्वतरोद्गारिसुफणोत्कृष्टकुण्डलः ॥ १३॥

आनन्दवनवासोऽथ अविमुक्तमहेश्वरः ।
आङ्कारनिलयो धन्वी कदारेशोऽमितप्रभः ॥ १४॥

नर्मदालिङ्गनिलयो निष्पापजनवत्सलः ।
महाकैलासलिङ्गात्मा वीरभद्रप्रसादकृत् ॥ १५॥

कालाग्निरुद्रोऽनन्तात्मा भस्माङ्गो गोपतिप्रियः ।
वेदाश्वः कञ्जजाजानिनेत्रपूजितपादुकः ॥ १६॥

जलनधरवधोद्युक्तदिव्यचक्रप्रदायकः ।
वामनो विकटो मुण्डस्तुहुण्डकृतसंस्तुतिः ॥ १७॥

फणीश्वरमहाहारो रुद्राक्षकृतकङ्कणः ।
वीणापाणिर्गानरतो ढक्कावाद्यप्रियो वशी ॥ १८॥

विशालवक्षाः शैलेन्द्रजामाताऽमरसत्तमः ।
हृत्तमोनाशको बुद्धो जगत्कन्दार्दनो बली ॥ १९॥

पलाशपुष्पपूज्याङ्घ्रिः पलाशनवरप्रदः ।
सागरान्तर्गतो घोरः सद्योजातोऽम्बिकासखः ॥ २०॥

वामदेवः सामगीतः सोमः सोमकलाधरः ।
निःसीम महिमोदारो दू(दा)रिताखिलपातकः ॥ २१॥

तपनान्तर्गतो धाता धेनुपुत्रवरप्रदः ।
बाणहस्तप्रदो नेता नमुचेर्वीर्यवर्धनः ॥ २२॥

नागाजिनाङ्गो नागेशो नागेशवरभुषणः ।
अगेशशायी भूतेशो गणकोलाहलप्रियः ॥ २३॥

प्रसन्नास्योऽनेकबाहुः शूलधृक् कालतापनः
कोलप्रमथनः कूर्ममहाखर्पटधारकः ॥ २४॥

मारसिह्माजिनधरो महालाङ्गलधृग्बली ।
ककुदुन्मथनो हेतुरहेतुः सर्वकारणः ॥ २५॥

कृशानुरेताः सोत्फुल्लभालनेत्रोऽमरारिहा ।
मृगबालधरो धन्वी शक्रबाहुविभञ्जकः ॥ २६॥

दक्षयज्ञप्रमथनः प्रमथाधिपतिः शिवः ।

शतावर्तो युगावर्तो मेघावर्तो दुरासदः ॥ २७॥

मनोजवो जातजनो वेदाधारः सनातनः ।
पाण्डरागोः(ङ्गो)गोऽजिनाङ्गः कर्मन्दिजनवत्सलः ॥ २८॥

चातुर्होत्रो वीरहोता शतरुद्रीयमध्यगः ।
भीमो रुद्र उदावर्तो विषमाक्षोऽरुणेश्वरः ॥ २९॥

यक्षराजनुतो नाथो नीतिशास्त्रप्रवर्तकः ।
कपालपाणिर्भगवान्वैयाघ्रत्वगलङ्कृतः ॥ ३०॥

मोक्षसारोऽध्वराध्यक्ष ध्वजजीवो मरुत्सखः ।
आरुणोयस्त्वगध्यक्षो कामनारहितस्तरुः ॥ ३१॥

बिल्वपूज्यो बिल्वनीशो हरिदश्वोऽपराजितः ।
बृहद्रथन्तरस्तुत्यो वामदेव्यस्तवप्रियः ॥ ३२॥

अघोरतर रोचिष्णुर्गम्भीरो मन्युरीश्वरः ।
कलिप्रवर्तको योगी साङ्ख्यमायाविशारदः ॥ ३३॥

विधारको धैर्यधुर्यः सोमधामान्तरस्थितः ।
शिपिविष्टो गह्वरेष्टो ज्येष्ठो देवः कनिष्ठकः ॥ ३४॥

पिनाकहस्तोऽवरजो वर्षहरीश्वरः ।
कवची च निषङ्गी च रथघोषोऽमितप्रभः ॥ ३५॥

कालञ्जरो दन्दशूको विदर्भेशो गणातिगः ।
गभस्तीशो मुनिश्रेष्ठो महर्षिः संशितव्रतः ॥ ३६॥

कर्णिकारवनावासी करवीरसुमप्रियः ।
नीलोत्पलमहास्रग्वी करहाटपुरेश्वरः ॥ ३७॥

शतर्चनः परानन्दो ब्राह्मणार्च्योपवीतवान् ।
बली बालप्रिया धर्मो हिरण्यपतिरप्पतिः ॥ ३८॥

यमप्रमथनोष्णीषी चक्रहस्तः पुरान्तकः ।
वसुषेणोऽङ्गनादेहः कौलाचारप्रवर्तकः ॥ ३९॥

तन्त्राध्यक्षो मन्त्रमयो गायत्रीमध्यकः शुचिः ।
वेदात्मा यज्ञसम्प्रीतो गरिष्ठः पारदः कली ॥ ४०॥

ऋग्यजुःसामरूपात्मा सर्वात्मा क्रतुरीश्वरः ।
हिरण्यगर्भजनको हिरण्याक्षवरप्रदः ॥ ४१॥

दमिताशेषपाषण्डो दण्डहस्तो दुरासदः ।
दूर्वार्चनप्रियकरो रन्तिदेवोऽमरेश्वरः ॥ ४२॥

अमृतात्मा महादेवो हरः संहारकारकः ।
त्रिगुणो विखना वाग्मी त्वङ्मांसरुधिरांशकः ॥ ४३॥

वत्सप्रियोऽथ सानुस्थो विष्णू रक्तप्रियो गुरुः ।
किरातवेषः शोणात्मा रत्नगर्भोऽरुणेक्षणः ॥ ४४॥

सुरासवबलिप्रीतस्तत्पूर्षोऽगन्धदेहवान् ।
व्योमकेशः कोशहीनः कल्पनारहितोऽक्षमी ॥ ४५॥

सहमानश्च विव्याधी स्फटिकोपलनिर्मलः ।
मृत्युञ्जयो दुराध्यक्षो भक्तिप्रीतो भयापहः ॥ ४६॥

गन्धर्वगानसुप्रीतो विष्णुगर्भोऽमितद्युतिः ।
ब्रह्मस्तुतः सूर्यनेत्रो वीतिहोत्रोऽर्जुनान्तकः ॥ ४७॥

गर्वापहारको वाग्मी कुम्भसम्भवपूजितः ।
मलयो विन्ध्यनिलया महेन्द्रो मेरुनायकः ॥ ४८॥

पार्वतीनायकोऽजय्यो जङ्गमाजङ्गमाश्रयः ।
कुरुविन्दोऽरुणो धन्वी अस्थिभूषो निशाकरः ॥ ४९॥

समुद्रमथनोद्भूतकालकूटविषादनः ।
सुरासुरेन्द्रवरदो दयामूर्तिः सहस्रपात् ॥ ५०॥

कारणो वीरणः पुत्री जन्तुगर्भो गरादनः ।
श्रीशैलमूलनिलयः श्रीमदभ्रसभापतिः ॥ ५१॥

दक्षिणमूर्तिरनघो जलन्धरनिपातनः ।
दक्षिणो यजमानात्मा दीक्षितो दैत्यनाशनः ॥ ५२॥

कल्माषपादपूज्याङ्घ्रिरतिदो तुरगप्रियः ।
उमाधवो दीनदयो दाता दान्तो दयापरः ॥ ५३॥

श्रीमद्दक्षिणकैलासनिवासो जनवत्सलः ।
दर्भरोमा बलोन्नेता तामसोऽन्नविवर्धनः ॥ ५४॥

नमस्कारप्रियो नाथ आनन्दात्मा सनातनः ।
तमालनीलसुगलः कुतर्कविनिवारकः ॥ ५५॥

कामरूपः प्रशान्तात्मा कारणानां च कारणः ।
तृणपाणिः कान्तिपरो मणिपाणिः कुलाचलः ॥ ५६॥

कस्तूरीतिलकाक्रान्तफालो भस्मत्रिपुण्ड्रवान् ।
वारणाङ्गालङ्कृताङ्गो महापापनिवारणः ॥ ५७॥

प्रकाशरूपो गुह्यात्मा बालरूपो बिलेशयः ।
भिक्षुप्रियो भक्ष्यभोक्ता भरद्वाजप्रियो वशी ॥ ५८॥

कर्मण्यस्तारकोभूत कारणो यानहर्षदः ।
वृषगामी धर्मगोप्ता कामी कामाङ्ग नाशनः ॥ ५९॥

कारुण्यो वाजरूपात्मा निर्धर्मो ग्रामणीः प्रभुः
अरण्यः पशुहर्षश्च सौनिको मेघवाहनः ॥ ६०॥

कुमारगुरुरानन्दो वामनो वाग्भवो युवा ।
स्वर्धुनीधन्यमौलिश्च तरुराजो महामनाः ॥ ६१॥

कणाशनस्ताम्रघनो मयप्रीतोऽजरामरः ।
कौणपारिः भालनेत्रो वर्णश्रमपरायणः ॥ ६२॥

पुराणवृन्दसम्प्रीत इतिहासविशारदः ।
समर्थो नमिताशेषदेवो द्योतकरः फणी ॥ ६३॥

कर्षको लाङ्गलेशश्च मेरुधन्वा प्रजापतिः ।
उग्रः पशुपतिर्गोप्ता पवमानो विभावसुः ॥ ६४॥

उदावसुर्वीतराग उर्वीशो वीरवर्धनः ।
ज्वालमालोऽजिताङ्गश्च वैद्युदग्निप्रवर्तकः ॥ ६५॥

कमनीयाकृतिः पाता आषाढो(ढः)षण्ढवर्जितः ।
पुलिन्दरूपः पुण्यात्मा पुण्यपापफलप्रदः ॥ ६६॥

गार्हपत्यो दक्षिणाग्निः सभ्यो वसथभृत्कविः ।
द्रुम आहवनीयश्च तस्करोऽथ मयस्करः ॥ ६७॥

शाङ्करो वारिदोऽवार्यो वातचक्रप्रवर्तकः ।

कुलिशायुधहस्तश्च विकृतो जटिलः शिखी ॥ ६८॥

सौराष्ट्रवासी देवेड्यः सह्यजातीरसंस्थितः ।
महाकायो वीतभयो गणगीतो विशारदः ॥ ६९॥

तपस्वी तापसाचार्यो द्रुमहस्तोज्ज्वलत्प्रभुः ।
किन्दमो मङ्कणः प्रीतो जातुकर्णिस्तुतिप्रियः ॥ ७०॥

वेनो वैन्यो विशाखश्चाऽकम्पनः सोमधारकः ।
उपायदो दारिताङ्गो नानागमविशारदः ॥ ७१॥

काव्यालापैककुशलो मीमांसावल्लभो ध्रुवः ।
तालमूलनिकेन्तश्च बिल्वमूलप्रपूजितः ॥ ७२॥

वेदाङ्गो गमनोऽगम्यो गव्यः प्रातः फलादनः ।
गङ्गातीरस्थितो लिङ्गी अलिङ्गो रूपसंश्रयः ॥ ७३॥

श्रान्तिहा पुण्यनिलयः पललाशोऽर्कपूजितः ।
महेन्द्रविष्णुजनको ब्रह्मतातस्तुतोऽव्ययः ॥ ७४॥

कर्दमेशो मतङ्गेशो विश्वेशो गन्धधारकः ।
विशालो विमलो जिष्णुर्जयशीलो जयप्रदः ॥ ७५॥

दारिद्र्यमथनो मन्त्री शम्भुः शशिकलाधरः ।
शिंशुमारः शौनकेज्यः श्वानपः श्वेतजीवदः ॥ ७६॥

मुनिबालप्रियोऽगोत्रो मिलिन्दो मन्त्रसंस्थितः ।
काशीशः कामिताङ्गश्च वल्लकीवादनप्रियः ॥ ७७॥

हल्लीसलास्यनिपुणः सल्लीलो वल्लरीप्रियः ।
महापारदसंवीर्यो वह्निनेत्रो जटाधरः ॥ ७८॥

आलापोऽनेकरूपात्मा पुरूषः प्रकृतेः परः ।
स्थाणुर्वेणुवनप्रीतो रणजित्पाकशासनः ॥ ७९॥

नग्नो निराकृतो धूम्रो वैद्युतो विश्वनायकः ।
विश्वाधिकः शान्तरवः शाश्वतः सुमुखो महान् ॥ ८०॥

अणोरणुः श्वभ्रगतः [तोह्य] अवटेशो नटेश्वरः ।
चित्रधामा चित्रमानुर्विचित्राकृतिरीश्वरः ॥ ८१॥

इन्द्रोऽजोऽमूर्तिरूपात्मा[ह्य]अमूर्तो वह्निधारकः ।
अपस्मारहरो गुप्तो योगिध्येयोऽखिलादनः ॥ ८२॥

नक्षत्ररूपः क्षत्रात्मा क्षुतृष्णाश्रमवर्जितः ।
असङ्गो भूतहृदयो वालखिल्यो मरीचिपः ॥ ८३॥

पञ्चप्रेतासनासीनो योगिनीकणसेवितः ।
नानाभाषानुचतो [नुवचनो] नानादेशसमाश्रयः ॥ ८४॥

वृन्दारकगणस्तुत्यः पुरन्दरनतिप्रियः ।
प्रघसो विघसाशी च [चाप्य] अत्राधिपतिरन्नदः ॥ ८५॥

पन्नगाभरणो योगी गुरुर्लौकिकनायकः ।
विराजो विश्वतोधर्मी बभ्लुशो बाहुकप्रियः ॥ ८६॥

प्रधाननिपुणो मित्रो ह्यूर्ध्वरेता महातपाः ।
कुरुजाडागलवासी च नित्यतृप्तो निरञ्जनः ॥ ८७॥

हिरण्यगर्भो भूतादिस्वराट् सम्राड्विराड्वदुः ।
पटहध्वनिसम्प्रीतो नतमुक्तिप्रदायकः ॥ ८८॥

फलप्रदः भालनेत्रः फणीश्वरमहाङ्गधृक् ।
वास्तुपो वासवो वात्या वर्मभिद्वसनोज्ज्वलः ॥ ८९॥

मीढुष्टमः शिवतमो वसुः शिवतरो बली ।
निधनेशो निधानेशः पुराजिद्राष्ट्रवर्धनः ॥ ९०॥

अयुतायुः शतायुश्च प्रमितायुः शताध्वरः ।
सहस्रशृङ्गो वृषभ उरुगायोरुमीढुकः ॥ ९१॥

गन्ता गमयिता गाता गरुत्मान् गीतवर्धनः ।
रागरागिणिकाप्रतिस्तालपाणिर्गदापहः ॥ ९२॥

देवेशः खण्डपरशुः प्रचण्डतरविक्रमः ।
उरुक्रमो महाबाहुर्हेतिधृक्पावकादनः ॥ ९३॥

गणिकानाट्यनिरतो विमर्शो वावदूककः ।
कलिप्रमथनो धीरो धीरोदात्तो महाहनुः ॥ ९४॥

क्षयद्वीरोमुञ्चि(मञ्जु)केश कल्मलीकः (की) सुरोत्तमः ।
वज्राङ्गो वायुजनको ह्यष्टमूर्तिः कृपाकरः ॥ ९५॥

प्रहृतः परमोदारः पञ्चाक्षरपरायणः ।
कर्कन्धुः कामदहनो मलिनाक्षो जडाजडः ॥ ९६॥

कुबेरपूजितपदो महातक्षककङ्कणः ।
शङ्खणो मधुरारावो मृडः सस्पिञ्जरोऽजरः ॥ ९७॥

मार्गो मार्गप्रदो मुक्तो विजितारिः परोऽवरः ।
प्रणवार्थो वेदमयो वेदान्ताम्बुज भास्करः ॥ ९८॥

सर्वविद्याधिपः सौम्यो यज्ञेशः क्षेत्रनायकः ।
पापनाशकरो दिव्यो गोभिलो गोपरो गणः ॥ ९९॥

गणेशपूजितपदो ललिताम्बामनोहरः ।
कक्षवासो महोक्षाङ्को निस्तमस्तोमवर्जिः ॥ १००॥

निःसीममहिमोदारः प्रभामूर्तिः प्रसन्न(दृ)क् ।
स्तोभ प्रीतो भारभूतो भूभारहरणः स्थिरः ॥ १०१॥

क्षराक्षरोधरो धर्ता सागरान्तर्गतो वशी ।
रम्यो रस्यो रजस्योऽथ प्रवाह्यो वैद्युतोऽनलः ॥ १०२॥

सिकत्यो वाद्य उर्वर्यो मेध्य ईध्रिय वाक्पटुः ।
प्रपञ्चमायारहितः कीर्तिदो वीर्यवर्धनः ॥ १०३॥

कालचक्रान्तरहितो नित्यानित्योऽथ चेतनः ।
गर्वोन्नतो भटाकारो मृगयुर्भवहा भवः ॥ १०४॥

शङ्गः शताङ्गः शीताङ्गो नागाङ्गो भस्मभूषणः ।
त्रियम्बकोऽम्बिकाभर्ता नन्दिकेशः प्रसादकृत् ॥ १०५॥

चण्डीशवरदो दिव्यो मायाविद्याविशारदः ।
मृगाङ्कशेखरो भव्यो गौरीपूज्यो दयामयः ॥ १०६॥

प्रमाथनोऽविकथनो गर्गो वीणाप्रियः पटुः ।
वर्णी वनस्थो यतिराट् गूढगर्भो विरोचनः ॥ १०७॥

शबरो बर्बरो धौम्यो विराड्रूपः स्थितिप्रदः ।
महाकारुणिको भ्रान्तिनाशकः शोकहा प्रभुः ॥ १०८॥

अशोकपुष्पपूज्याङ्घ्रिर्मणिभद्रो धनेश्वरः ।

अमृतेशोद्रुतगति स्तगरोऽर्जुनमध्यगः ॥ १०९॥

दमो विरोधहृत्कान्तो नीतिज्ञो विष्णुपूजितः ।
सुमप्रियो वातमयो वरीयान्कर्मठो यमः ॥ ११०॥

दिगम्बरो(रः) शममयो धूमपः शुक्रगर्भकः ।
अट्टहासोऽतल्पशय आसीनो धावमानकः ॥ १११॥

तुराषाण्मेघमध्यस्थो विपाशातीरसंस्थितः ।
कुलोन्नतः कुलीनश्च व्यवहारप्रवर्तकः ॥ ११२॥

केतुमालो हरिद्राङ्गो द्रावि(वी) पुष्पमयो भृगुः ।
विशोषकोर्वीनिरतस्त्वग्जातो रुधिक(र)प्रियः ॥ ११३॥

अकैतक(व)हृदावासः क्षपानाथकलाधरः ।
नक्तञ्चरोदिवाचारी दिव्यदेहो विनाशकः ॥ ११४॥

कदम्बवनमध्यस्थो हरिद्राङ्गोर्मिमध्यगः ।
यमुनाजलमध्यस्थो जालकोऽजमखो वसुः ॥ ११५॥

वसुप्रद वीरवर्यः शूलहस्तः प्रतापवान् ।
खड्गहस्तो मण्डलात्मा मृत्युर्मृत्युजिदीश्वरः ॥ ११६॥

लङ्कावासो मेघमाली गन्धमादनसंस्थितः ।
भैरवो भरणो भर्ता भ्रातृव्यो नामरूपगः ॥ ११७॥

अव्याकृतात्मा भूतात्मा पञ्चभूतान्तरोऽस्मयः ।
अहनन्यः शब्दमय कालाधरः कलाधरः ॥ ११८॥

भृगुतुङ्गश्चीरवासी(साः) कैवर्तोऽनायकोऽर्धकः ।
करेणुपो गन्धमदश्चाम्पेयकुसुमप्रियः ॥ ११९॥

भद्रदश्चर्मवसनो वैराजस्तोत्रकारकः ।
सुमप्रीतः सामगीती उर्जो वर्चः कुलेश्वरः ॥ १२०॥

ककुद्मान् पीतवसनो वध्येशो नारदः पिता ।
क्रव्यादनो नीतिमयो धर्मचक्रप्रवर्तकः ॥ १२१॥

शष्प्यः फेन्यो विनीर्णेता कङ्कणोऽनासिकोऽचलः ।
एणाङ्कः शलभाकार ः शालुरो ग्रामसंस्थितः ॥ १२२॥

महाविशेषकथनो वारितीरास्थितोऽचलः ।
कृपीटयोनिः शान्तात्मा गुणवान् ज्ञानवाञ्छुचिः ॥ १२३॥

सर्वपापहरोऽलिङ्गो भगमालोऽप्रतारणः ।
आनन्दधन आतार्य इरिण्योऽथप्रपथ्यकः ॥ १२४॥

गङ्गातीरस्थितो देवो ह्यविमुक्तसमाश्रयः ।
महास्मशाननिलयोऽवलयो वालिपूजितः ॥ १२५॥

करन्धमो व्रात्यवर्यो मानवो जीवकोऽशठः ।
कर्मदेवमयो ब्रह्मा ऋतं सत्यं महेश्वरः ॥ १२६॥

सुमङ्गलः सुखमयो ज्ञानानन्दोऽमिताशनः ।
मनोमयः प्राणमयो विज्ञानात्मा प्रसादनः ॥ १२७॥

आनन्दमयकोशात्मा धर्मसीमाथ भूमकः ।
सदाशिवो विशिष्टात्मा वसिष्ठार्चितपादुकः ॥ १२८॥

नीलग्रीवः सैन्यपालो दिशानाथो नतिप्रियः ।
केशवोन्मथनो मौनी मधुसूदनसूदनः ॥ १२९॥

उदुम्बरकरो डिम्भो बम्भरः पिञ्छिलातलः ।
मूलस्तालकरो वर्ण्योऽपर्णादः प्राणमाश(ष)कः ॥ १३०॥

अपर्णापतिरीशास्योऽसम्पूर्णः पूर्णरूपवान् ।
दीपमालो जाङ्गलिको वैतुण्डस्तुण्डकः प्रियः ॥ १३१॥

ऊलुकः कलविङ्कोऽथ शुकनादप्रसादकृत् ।
जैगीषव्यतपःप्रीतो रावणेन्द्रबलार्दनः ॥ १३२॥

मार्कण्डेयमहामृत्युनाशको ज्ञानधारकः ।
अहर्गणक्रियातीतः सर्पप्रीतोऽनिलाशनः ॥ १३३॥

वेगाधारो धैर्यधनो धनधान्यप्रदायकः ।
नाद्यो वैद्यो वाद्यरतो गद्यपद्यस्तुतो द्युकः ॥ १३४॥

भेरीभाङ्कारनिरतो मृगचर्मविधायकः ।
पुण्यकीर्तिः पुण्यलभ्यो मोहनास्त्रो(स्त्र)विशारदः ॥ १३५॥

कैलालशिखरावासः पारिजातवनाश्रयः ।
ईला(डा)दिरवसम्प्रीतो माहेन्द्रस्तुतिहर्षितः ॥ १३६॥

यूपवाटो भार वहः कोमलाङ्गो जनाश्रयः ।
विश्वामित्रप्रियो बालः पाकयज्ञरतः सुखी ॥ १३७॥

वामाचारप्रियोन्नेता शक्तिहस्तो दुरासदः ।
सर्वाकारः शाश्वतत्मा वाङ्मनोदूरगो हरः ॥ १३८॥

स्कन्द उवाच -
इत्येतन्नामसाहस्रं शेषाशेषमुखोद्गतम् ।
शम्भोर्दिव्यं मुनिश्रेष्ठ श्रवणात्पापनाशनम् ॥ १३९॥

सर्वान्कामानवाप्नोति शिवार्चनपरायणः ।
त्वमेभिर्मुनिमुख्यैश्च शृण्वन्भक्तिमवाप्नुयाः ॥ १४०॥

कुमारी पतिमाप्नोति निर्धनो धनवान्भवेत् ।
जयार्थी जयमाप्नोति क्षयद्वीरप्रसादतः ॥ १४१॥

स्कन्द उवाच -
इति तव गदितं मे नामसाहस्रमेतत्
हरवरचरणाब्जाराधने साधनं ते ।
(मुनिगणवरबाणाद्यै)
मुनिजनगणवर्यैर्धार्यमेतत्सुराद्यैः
परमपदमवाप्तुः (प्तुं) शङ्कराज्ञावशेनः ॥ १४२॥

॥ इति श्रीशिवरहस्ये नवमांशे सहस्रनामकथनं नाम द्वितीयोऽध्यायः ॥

श्रीशिवरहस्यम् । नवमांशः । अध्यायः २। १-१४२ ॥

- shrIshivarahasyam . navamAMshaH . adhyAyaH 2. 1-142 ..

Pरूफ्रेअद् ब्य् षिवकुमर् ठ्यगरजन् शिवकुमर्२४ अत् ग्मैल्ॅओम् अन्द् ड्Pड्

Please send corrections to *sanskrit@cheerful.com*